# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम्–५ | गुणाः – ७० |
| विषयः – फलितज्योतिषम् । | (C.C.- 3.5.9. OLD ) | समयः ३:०० तः ६:०० |
| दिनाङ्कः – १४/१०/२०१९ | सन्दर्भग्रन्थः –पञ्चस्वराः, लघुजातकम् । | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) चतुर्विंशति वर्षाणि यावद्गच्छन्ति जन्मतः ।
तावद्रिष्टं च निश्चित्य आयुर्दायं न चिन्तयेत् ॥

(ख) कुज शुक्र वुधेन्द्वर्क सौम्य शुक्रावनीभुवाम् ।
जीवार्कि भानुजेज्यानां क्षेत्राणि स्युरजादयः ॥

(ग) शुभे च दण्ड संयोगे सर्वथा पाप वर्जिते ।
वालस्य कुशलं सर्वं शुभं यदि युतेक्षिते ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(क) त्रिपताकीचक्रविचारः ।

(ख) ग्रहबलनिरूपणम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) कर्मस्थाने स्थितः सौरिः शत्रुस्थाने कलानिधिः ।
क्षितिजः सप्तमस्थाने समात्रा म्रियते शिशुः ॥

(ख) अष्टमस्थो यदा पापः सौम्यश्चद्वादशे स्थितः ।
तदा मृत्युं व्रजेदेव देवराज समो यदि ॥

(ग) लग्नाद्व्ययगतो राहुः पातित्यं कारयेत् ध्रुवम् ।
पापक्षेत्रात्विदं वाच्यं मिथ्यावादं शुभालये ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(क) वालारिष्टिविचारः ।

(ख) मातृनाशविचारः ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) गृहहोराद्रेष्काणा नवभागो द्वादशांशकस्त्रिंशः
वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः ॥

(ख) जीवासितौ विप्राणां क्षत्राणां रविकुजौ विशांचन्द्रः ।

शूद्राधिपः शशिसुतः शनैश्चरः सङ्करभवानाम् ॥

(ग) आत्मा रविः शीतकरस्तु चेतः

सत्त्वं धराजः शशिजोऽथ वाणी ।

ज्ञानं सुखं चेन्द्रगुरुर्मदश्च

शुक्रः शनिः कालनरस्य दुःखम् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत ।** **१०**

(क) ग्रहाणां दृष्टिस्थानम् ।

(ख) षडवर्गविचारः ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **१०**

(१) पञ्चस्वराः इत्यस्य रचनाकारः कः ?

(२) त्रिपताकीचक्रे कति रेखाः भवन्ति ?

(३) जन्मतः कति वर्षाणि यावद् आयुविचारः न कर्तव्यम् ?

(४) एकस्मिनहोरात्रे कति अर्धयामेशाः भवन्ति ?

(५) एकस्मिन् अर्धयामेशे कति दण्डेशाः भवन्ति ?

(६) पञ्चस्वाराणां नामानि लिखत ।

(७) एकस्मिन् वर्षे सूर्यस्य दशामानं लिखत ।

(८) बुधस्य मूलत्रिकोणराशिः लिखत ।

(९) केन राशिना उदरस्य विचारः भवति ?

(१०) शीर्षोदयराशीणां नामानि लिखत ।

(११) उभयोदयराशिणां नामानि लिखत ।

(१२) लघुजातकम् इत्यस्य रचनाकारः कः ?

(१३) मेषराशेः स्वरनाम लिखत ।

(१४) जलचरराशिनां नामानि लिखत ।

(१५) धर्मस्थानं कस्य भावस्य अपरो नाम अस्ति ?

----oooo----